श्रीकाशीपण्डितसभया "पण्डितराजे" त्युपाधिविभूषितेन
परमहंसपरिव्राजकाचार्य–स्वामिश्रीभगवदाचार्येण
प्रणीतेन
तैत्तिरीयोपनिषत्संस्कारभाष्येण सहिता

तैत्तिरीयोपनिषत्

अथ प्रथमोनुवाकः

ॐ शं नो मित्रः शं वरुणः शं नो भवत्वर्यमा। शं न इन्द्रो बृहस्पतिः शं नो विष्णुरुरुक्रमः। नमो ब्रह्मणे। नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि। त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि। ऋतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु तद्वक्तारमवतु। अवतु माम्। अवतु वक्तारम् ॥ १ ॥

मित्रः सूर्यः। वरुणो वरणीयः। अर्यमा व्यापकः। इन्द्रः परमैश्वर्यवान्। बृहस्पतिर्बृहतां पतिः। विष्णुः सर्वव्यापकः। रुरुक्रमो महाशक्तिः। अन्यत् सर्वं स्पष्टम् ॥ १ ॥

इति तैत्तिरीयोपनिषदि प्रथमोनुवाकः

●

अथ द्वितीयोनुवाकः

ॐ शिक्षां व्याख्यास्यामः। वर्णः स्वरः। मात्रा बलम्। साम सन्तानः। इत्युक्तः शीक्षाध्यायः ॥२॥

लेखकप्रमादेन शीक्षामित्यत्रेकारस्य दीर्घत्वम्। शिक्ष्यन्त इति शिक्षाः। वर्णादयः। एक वचनमौपनिषदम्। शिक्षां व्याख्यास्याम आख्यास्यामः। व्याख्यास्याम इत्यत्र विविरुद्धार्थे। एवं च संक्षेपेण कथयिष्याम इतिभावः। प्रतिज्ञामनुसृत्योपदिशति वर्णोकारादिः। स्वर उदात्तादिः। मात्रा ह्रस्वाकारादिचिह्नविशेषः। बलं प्रयत्नः। स च बाह्य आभ्यन्तरश्च। साम शनैरुच्चारणम्। अथवा सन्धिः। सन्तानोसन्धिः। इत्युक्तः शिक्षाध्यायः शिक्षाप्रदानाध्यायः ॥२॥

इति तैत्तिरोयोपनिषदि द्वितीयोनुवाकः

●

अथाष्टमोनुवाकः

ओमिति ब्रह्म। ओमितीदं सर्वम् ॥१॥

द्वितीयानुवाकमारभ्य सप्तमानुवाकपर्यंतं नास्त्युपनिषत्स्वरूपम्। ब्रह्मविद्यैवोपनिषदिति गीयते। तेष्वनुवाकेषु नास्ति ब्रह्मविद्या ततस्तत्र नास्त्युपनिषत्त्वम्। ओमितीति। अवति सर्वं रक्षतीत्योम्। सर्वरक्षणसामर्थ्यं यत्र तन्नाम गृह्णाति ब्रह्मेति। ब्रह्मणश्च व्यापकत्वादुपदिशति सर्वमिदं प्रतीयमानमोमिति ॥१॥

इति तैत्तिरोयोपनिषदि अष्टमोनुवाकः

●

अथ नवमोनुवाकः

सत्यमिति सत्यवचा राथीतरः। तप इति तपोनित्यः पौरुशिष्टिः। स्वाध्यायप्रवचने एवेति नाको मौद्गल्यः। तद्धि तपस्तद्धि तपः ॥१॥

मनसा सत्यं ध्यातव्यं वचसा सत्यं वक्तव्यं कर्मणा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

च सत्यमनुष्ठेयमिति सत्यवचाः सत्यमेव वचो यस्य स राथीतरो रथीतरगोत्रोत्पन्न आचार्यः। तप इति तप एव कर्तव्यमिति तपोनित्यस्तपोनियतः पौरुशिष्टिः पुरुशिष्टस्यापत्यमाचार्यो मन्यते। तच्च तपः स्वाध्याय-प्रवचनाभ्यां सह शीतोष्णादिद्वन्द्वतितिक्षारूपम्। स्वाध्यायप्रवचने एव कर्तव्ये इति मुद्गलस्यापत्यं मौद्गल्यो नाम्ना नाक इति मन्यते। कं सुखम्। न कमकम् दुःखम्। न अकं यस्य स नाकः आनन्दीति यावत्। तद्धि तपस्तद्धि तप इति द्विरुक्त्या नातः परं किञ्चित्पवित्रं तपो वर्ततइति सूचितम् ॥१॥

इति तैत्तिरीयोपनिषदि नवमोनुवाकः

●

अथ दशमोनुवाकः

अहं वृक्षस्य रेरिवा कीर्तिः पृष्ठं गिरेरिव। ऊर्ध्वपवित्रो वाजिनीव स्वमृतमस्मि। द्रविणं सवर्चसम्। सुमेधा अमृतोक्षितः। इति त्रिशङ्कोर्वेदानुवचनम् ॥१॥

अहं तत्त्वज्ञो वृक्षस्य विनाशिनो जगतो रेरिवा गमयिता च्छेत्ता नाशयितेति यावत्। आचार्य उपदिशति हे शिष्य त्वया सततमेवमेव ध्यातव्यम्। किं च तेन जगच्छेदेन कीर्तिर्गिरेः पर्वतस्य पृष्ठमिवारोहतीति शेषः। इत्यपि ध्येयम्। ऊर्ध्वपवित्र ऊर्ध्वरश्चासौ पवित्रश्च। अहं जगद्व्यवहारनिवृत्तः सन्नूर्ध्वः श्रेष्ठोस्मि। वाजिन्यश्वे स्थित इव तव मार्गे गतिशीलो भव। स्वमृतमसि शोभनम् अमृत मसि। त्वममृतमिति मत्वा मृत्योर्न भेतव्यम्। किं चान्यानपि मृत्युभयादपनय। सुवर्चसं शोभनं ब्रह्मतेज एव ते द्रविणं धनमितिमत्वा न लौकिकधनाय प्रयतितव्यम्। एवं सति त्वं सुमेधा भविष्यसि तथामृतोक्षितोमृतेनोक्षितः सिक्तो भविष्यसि। अमृतो भविष्यसि भविष्यसि चाक्षितोविनाशीति। इति त्रिशंकोराचार्यस्व वेदानुवचनम् ॥१॥

इति तैत्तिरीयोपनिषदि दशमोनुवाकः

●

अथैकादशोनुवाकः

वेदमनूच्याचार्योन्तेवासिनमनुशास्ति।

वेदमनूच्योपदिश्यान्तेवासिनं स्वशिष्यमाचार्योनुशास्ति। किमनुशास्ति तदाह—

सत्यं वद।

सर्वदा सत्यमेव वक्तव्यं नासत्यं कदाचिदपीति।

धर्मं चर।

धर्म एवादर्तव्यो नाधर्म इति।

स्वाध्यायान्मा प्रमदः।

स्वाध्यायो वेदः। तस्मान्न प्रमदितव्यम्। सर्वदा तदध्ययनाध्यापनादि कार्यमेव। न केवलमेतदेव तदाज्ञावशवर्तिता न हेयेति।

आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः।

गुरुकुले वसन् सर्वा एव विद्या अधिगत्याचार्याय दक्षिणारूपं प्रियं धनमाहृत्यादायोपहृत्य च प्रजातन्तुं मा व्यवच्छेत्सीः प्रजोत्पादनार्थं स्वगृहं गत्वा गार्हस्थ्यं स्वीकुर्वित्यर्थः।

सत्यान्न प्रमदितव्यम्।

सत्यात् प्रमादो न कर्तव्यः। सत्यस्य परित्यागो न कर्तव्यः।

धर्मान्न प्रमदितव्यम्।

धर्माचरणे प्रमादो न कर्तव्यः।

कुशलान्न प्रमदितव्यम्।

येन कर्मणा स्वस्य परेषां च कुशलं स्यात्तस्मात्प्रमादो न कर्तव्यः।

भूत्यै न प्रमदितव्यम्।

येन कर्मणा भूतिरैश्वर्यं तस्य प्राप्तिः स्यात्तत्कर्मणि प्रमादो न कर्तव्यः; अन्यथा दारिद्र्यं स्यात्।

स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्।१।

नित्यं वेदाध्ययनं सद्ग्रन्थाध्ययनं वा प्रवचनं वेदाध्यापनं सद्ग्रन्थाध्ययनं च कर्तव्यमेव ॥१॥

देवपितृकार्याभ्यां न प्रमदितव्यम्।

देवकार्यं सत्कार्यम्। पितृकार्यं पित्राज्ञापालनरूपम्। ताभ्यां प्रमादो न कर्तव्यः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मातृदेवो भव ।

मातरि देवबुद्धिर्भव ।

पितृदेवो भव ।

पितरि देवबुद्धिर्भव ।

आचार्यदेवो भव ।

आचार्य एव देव इति सर्वदा विश्वसिहि ।

अतिथिदेवो भव ।

न तिथिर्निश्चितागमनस्य यस्य सोतिथिः । तत्र देवबुद्धिर्भव ।

यान्यनवद्यानि कर्माणि तानि सेवितव्यानि । नो इतराणि ।

यानि यानि कर्माणि अनवद्यानि निर्दोषाणि स्युस्तान्येव सेवितव्यानि नो इतराणि ।

यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि नो इतराणि ॥२॥

अस्माकं गुरूणामपि यानि सुचरितानि सदाचरणानि स्युस्तान्येव त्वयोपास्यानि सेव्यानि आचरितव्यानि । इतराणि नेति ॥२॥

ये के चास्मच्छ्रेयांसो ब्राह्मणास्तेषां त्वयासनेन प्रश्वसितव्यम् ।

ये केपि चास्मदस्मत्तः श्रेयांसः श्रेष्ठा ब्राह्मणा ब्रह्मज्ञानिनः स्युस्तेषां त्वयासनेनासनदानेन प्रश्वसितव्यं कार्तार्थ्यं प्राप्तव्यम् । अतएवोपनिषत्काले ब्राह्मणाः क्षत्रिया अपि वेदवक्तारो ब्रह्मवक्तारो वासन् जात्या ब्राह्मणरपि ते पूजिता आसन् ।

श्रद्धया देयम् ।

यदि तेषां किञ्चिदभीप्सितं स्यात्तर्हि त्वया गृहस्थेन तच्छ्रद्धया देयम् ।

अश्रद्धया देयम् ।

यदि दाने न स्यात्ते प्रवृत्तिरश्रद्धा च स्यात्तथापि देयम् । पात्रे दानं नालाभाय भवतीतिभावः ।

श्रिया देयम् ।

यदि तव सविधे याचकाभीप्सितं पर्याप्तं धनं न स्यात्तर्हि तव श्रिया त्वद्धनानुरूपं देयम् ।

भिया देयम् ।

न स्यात्कदाचिन्ममापि याच्ञावसर इति भियापि देयम् ।

संविदा देयम् ॥ ३ ॥

ज्ञानपूर्वकं देयम् । येषां नास्त्यावश्यकता तेभ्यो न देयमिति ॥ ३ ॥

अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात् ये तत्र ब्राह्मणाः सम्मर्शिनो युक्ता आयुक्ता अलूक्षा धर्मकामाः स्युः । यथा ते तत्र वर्तेरँस्तथा तत्र वर्तेथाः ।

अथ कदाचित्ते तव येषु केषुचित्कर्मसु विचिकित्सा संशयः स्यादिदं कर्तव्यं न वेति, अथवा वृत्तविचिकित्सा आचारविचिकित्सा स्यादिदमाचरणीयं न वेति, तदा तत्र तव समीपे देशे ये सम्मर्शिनो विचारकुशला युक्ताः स्वे कर्तव्ये कर्मणि निरता आयुक्ताः समाधिनिरता योगिस्वभावा अलूक्षा अक्रूरा अत एव धर्मकामा धर्मं कामयमानाः स्युस्ते तस्मिंस्तस्मिन्विषये यथा वर्तेरँस्त्वयापि तत्र तथैव वर्तितव्यमिति ॥

अथाभ्याख्यातेषु । ये तत्र ब्राह्मणाः सम्मर्शिनो युक्ता आयुक्ता अलूक्षा धर्मकामाः स्युर्यथा ते तेषु वर्तेरँस्तथा तेषु वर्तेथाः ।

अभ्याख्याता दोषित्वेनाशङ्कितास्तेषु चापि तथैव वर्तितव्ये यथोपर्युक्ता ब्राह्मणा वर्तेरन् ।

एष आदेशः । एष उपदेशः । एषा वेदोपनिषत् । एतदनुशासनम् । एवमुपासितव्यम् । एवमु चैतदुपास्यम् ॥ ४ ॥

एष मम त्वदाचार्यस्यादेश आज्ञा । एष उपदेशः शिक्षा । एषा वेदोपनिषद् वेदरहस्यम् । अस्यैवर्षेर्वेदेष्वास्था परिदृश्या भवति । एतदनुशासनमवश्यकर्तव्यम् । उपास्या ये मया निर्दिष्टास्तेषामुपासनैवमेव कर्तव्या । ये चोपास्याः सेव्या मया परिगणितास्त एवोपास्या मन्तव्याः ॥ ४ ॥

इति तैत्तिरीयोपनिषदि एकादशोनुवाकः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथ आनन्दवली

अत्र केषांचिदुपनिषद्व्याख्यातॄणां मते तैत्तिरीयोपनिषत् आनन्दवल्ल्युपनिषदेव नास्ति। काचन तैत्तिरीयोपनिषत् पृथक्। बहूनां मते तैत्तिरीयोपनिषदन्तर्गतैवानन्दवल्ली। पूर्वमतं स्वीकृत्यैव रङ्गरामानुजादिभिः शिक्षाध्यायः परित्यक्तः। द्वितीयं मतमभिमत्य शंकराचार्यादिभिः शिक्षाध्यापि व्याख्यात एव। इतः परमानन्दवल्ल्याः प्रारम्भः। वल्लीति स्याद्वेल्यपरपर्यायः शब्दः। अथवा वल्ली बल्लरी ज्ञातव्या। सा चेयम्—

ॐ ब्रह्मविदाप्नोति परम्।

ब्रह्म वेत्तीति ब्रह्मवित्। यो ब्रह्मवित्स परमाप्नोति। अनेन वाक्यखण्डेन ब्रह्मपरयोः स्पष्ट एव भेदः प्रतीयते। यदि न स्याद्भेदो ब्रह्मविदाप्नोति ब्रह्मेत्येवोक्तं भवेत्। किं च ब्रह्मविदाप्नोति ब्रह्मेति वाक्यमप्यसंगतमेव देवदत्तज्ञो देवदत्तं प्राप्नोतीतिवत्। लोके तु देवदत्तज्ञानेन देवदत्तप्राप्तिः–संगतापि स्यात् परं ब्रह्मज्ञानी ब्रह्म प्राप्नोतीत्यत्र न सांगत्यम्। ब्रह्मवित्त्वमेव ब्रह्माप्तिः। ब्रह्माप्तिर्ब्रह्मवित्त्वान्न भिद्यते। तज्ज्ञानमेव तत्प्राप्तिः। भवतु नाम। दोषः। पूर्वं ब्रह्मवित्त्वं पश्चाद्ब्रह्माप्तिः। ज्ञानपूर्विकैव प्राप्तिर्भवति। घटज्ञाने सत्येव घटप्राप्तिर्भवति। परं काल्पनिकमिदं पौर्वापर्यं लोकबुद्धिविशुद्ध्यर्थम्। अथवा ब्रह्मवित्परं सुखमाप्नोतीति सुखमित्यध्याहार्यम्।

तदेषाभ्युक्ता। सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहायां परमे व्योमन्। सोऽश्नुते सर्वकामान् सह ब्रह्मणा विपश्चितेति।

तत्तस्मादेवैषा श्रुतिरभ्युक्ता कुत्रचित्केनचित्। तामेव श्रुतिमुपन्यस्यति—सत्यं ज्ञानमनन्तं ब्रह्मेत्यादि। ब्रह्मणस्त्रीणि विशेषणानि सत्यं ज्ञानमनन्तं चेति। यद्यसंगे ब्रह्मणि मास्तु विशेषणसंग इत्याग्रहश्चेत्सत्यं ज्ञानमनन्तमितित्रितयमेव ब्रह्मस्वरूपम्। सत्यमपि ब्रह्मैव ज्ञानमपि ब्रह्मैवानन्तमपि ब्रह्मैव। तद्ब्रह्म क्वास्तीति जिज्ञासायामुच्यते गुहायां अज्ञानगुहायां निहितं स्थितमिति यावत्। यावदज्ञानं तावन्न प्रकाशते इत्येव तस्य निहितत्वम्। तर्हि कुत्र तिष्ठति तत् इति प्रश्नमुत्थाप्य समाधत्ते "परमे व्योमन्" इति। परमेत्युत्कृष्टे हृदयाकाशे। सर्वत्र तिष्ठदपि तद्धृदयदेश एव प्रकाशत इति परमे व्योमन्नित्युक्तम्। न तेन तस्य व्यापकता पराहता भवति। निखिलगगनदेशे व्याप्तोत्युष्णरश्मिः घटजलेपि प्रकाशते घटजल एव प्रतिबिम्बितो भवति तद्वत्। एवं च यस्तत्त्वज्ञो ज्ञानप्रकाशिते स्वान्तःकरणे तद्वेद स सर्वकामान् अश्नुते सम्प्राप्नोति। तद्वेदने नैव सर्वकामसमाप्तिर्भवतीति भावः। न हि केवलं स एवं ब्रह्मवित्सर्वकामानामशिता भवति किन्त्वन्येनापि तथाविधेनेति श्रुतिराह विपश्चिता ब्रह्मणेति। विविधं पदार्थजातं तत्त्वतः पश्यति जानाति निर्धारयति निश्चिनोति स विपश्चित्। तस्यैवार्थस्य द्योतकं ब्रह्मणेतिपदम्। बृंहणाद् ब्रह्म। ब्रह्मज्ञानिना विदुषा सहेत्यर्थः। अत्र स्पष्टमेव दृश्यद्रष्ट्रोर्भेदो विभासितः।

तस्यैव ब्रह्मणः सकाशान्निखिलं वस्तुजातं जातमिति बोधयन्ती श्रुतिराह—

तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः। आकाशाद्वायुः। वायोरग्निः। अग्नेरापः। अद्भ्यः पृथिवी। पृथिव्या ओषधयः। ओषधिभ्योन्नम्। अन्नात्पुरुषः।

अत्र तस्माद् वा एतस्मादितिपदत्रयं भ्रांतिगर्ते निपातनाय प्रभवति बहूनाम्। तस्माद्वा एतस्मादिति ब्राह्मणपद्धतिः। दौर्यबुद्ध्या तस्मादिति। संनिकृष्टबुद्ध्या एतस्मादिति। आत्मनोः ब्रह्मणः। अत्रात्मञ्शब्दो ब्रह्मोल्लेखी। ब्रह्मशब्दस्यैव संनिहितत्वात्। निमित्तार्थे पञ्चमी। ब्रह्मण एव निमित्तादाकाशः सम्भूत उत्पन्नः। तस्यैव सकाशात् तस्मादेव वा निमित्तात् आकाशाद्वायुः प्रभवति। वायोरग्निरित्यादिः सृष्टिक्रम औपनिषदः। अन्नात्पुरुषः सम्भवतीत्यस्य पुरुषस्यास्तित्वं सम्भवतीत्यर्थः। अत्र पुरुषः शरीरम्। न त्वात्मा। यद्यात्मैव गृह्यते सोप्युत्पत्तिमानेव स्यात् ततश्चानि-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्योपि स्यात्। स च पुरुषोप्यन्नरसमयः। विकाराथ मयट्। अन्नारसादिभिर्जायमानः पुरुषोप्यन्नरसमय एव। शरीरं चेत्तदप्यन्नरसमयमेव। संभूत इति सर्वत्रान्वेति यत्र यत्र संभवः। इतः परं तस्येदमेव शिर इत्यादि पाठो मया परित्यक्तः। निरर्थकत्वात्, असांगत्याच्च। तदप्येष श्लोको भवतीतिनिर्दिश्यमानाग्रिम-श्लोकस्यान्नरसमय इत्यनेनैव सह सम्बन्धाच्चेति।

तदप्येष श्लोको भवति ॥१॥

इति प्रथमोनुवाकः

●

अथ द्वितीयोनुवाकः

अन्नाद्वै प्रजाः प्रजायन्ते याः काश्च पृथिवीं श्रिता। अथो अन्नेनैव जीवन्ति। अथैतदपियन्त्यन्ततः ॥

पृथिवीं श्रिताः पृथिव्यां स्थिता याः काश्च प्रजाः सन्ति सर्वा अन्नाद्वै अन्नादेव प्रजायन्ते। अथोत्पद्यान्नेनैव जीवन्ति। अन्नात्प्रजाः प्रजायन्त इत्यस्यान्नाद्वीर्यं वीर्याद्बलं पौरुषं बलाच्च प्रजा इति। निर्वीर्याणां प्रजानुत्पत्तिः सर्वानुगता। अन्नमाहात्म्यं समर्थयमानाह श्रुतिरन्नेनैव जीवन्ति सर्वा अपि प्रजाः। अथ न केवलमन्नाज्जायतेन्नादेव जीवतीत्येव किन्तु अन्तत एतदन्नमेवापियन्ति अपीता भवन्ति। लयं प्राप्नुवन्ति। अपीत्युपसर्गस्य यन्तीत्यनेनैव सम्बन्धः। अन्न एव तासामप्ययः। ननु न दृश्यतेन्ने कस्यप्यय इतिचेत्। सत्यम्। न दृश्यते। तद्विना तन्न भवतीत्येवाप्ययशब्दसारः। एतदेव मनसि निधाय ब्रवीति—

अन्नं हि भूतानां ज्येष्ठम्। तस्मात्सर्वौषधमुच्यते।

अन्नमेव भूतानां ज्येष्ठं महत्त्वपूर्णम्। भूतानामित्यस्य प्राणिनामित्यर्थः। तस्मादेव तत्सर्वौषधमुच्यते। अथवा उष दाहे। धेट् पाने। उषतीत्योषोग्निर्जाठरः। तं धयतीति ओषधम्। ओषधमेवौषधम्। अन्नभक्षणेन जाठरोनलः शाम्यतीति शमकत्वादन्नस्यौषधत्वम्। कस्यान्नस्य प्राप्तिरित्याह—

सर्वे वै तेन्नमाप्नुवन्ति येन्नं ब्रह्मोपासते।

अन्नमपि ब्रह्मैव। अन्नस्य ब्रह्मत्वख्यापनमन्नमाहात्म्यवर्धनार्थम्। येन्नं ब्रह्मोपासते क्षेत्रे वपन्ति जलादिना रक्षन्ति वर्धयन्ति अन्ते च लुनन्ति त एवान्नं प्राप्नुवन्ति। अतोन्नप्राप्तौ सर्वैः सावधानैर्भाव्यम्।

अन्नं हि भूतानां ज्येष्ठम्। तस्मात्सर्वौषधमुच्यते ॥

पूर्वमपि पठितमिदं वाक्यं स्मारयित्वा, अन्नाद्वै प्रजाः प्रजायन्त इति प्रारभ्य उक्तां श्रुतिमर्थतो निबध्नाति पुनः—

अन्नाद्भूतानि जायन्ते। जातान्यन्नेन वर्धन्ते। अद्यतेत्ति च भूतानि तस्मान्नं तदुच्यत इति ॥

अयं पूर्वोक्तार्थसंग्रहश्लोकः। पूर्वार्धं स्पष्टम्। उत्तरार्धं व्याख्यायते। भूतैरन्नमद्यते, अन्नं च भूतान्यत्ति तस्मादित्यर्थद्वयनिमित्तोभूताद्धेतोरन्नम् अन्नमुच्यते। भूतैरन्नमद्यत इति सर्वगम्यम्। अन्नं भूतान्यत्तीतिकथनं तु तद्विना सर्वेषां मृत्युप्रसङ्गोत एव तद्भूतानामतृ उच्यते ॥

तस्माद्वा एतस्मादन्नरसमयादन्योन्तर आत्मा प्राणमयः।

तर्ह्यन्नमेवात्मास्तु। किं तदितरात्मकल्पनयेत्याह—अस्मादन्नरसमयादन्य एवात्मान्तरः प्राणमयः। प्राण एवात्मेत्युपदिष्टं भवत्यत्र। कुतः प्राणमय आत्मोच्यत इत्याह—

तेनैव पूर्णः।

तेन प्राणमयेनात्मनैव एषोन्नरसमय आत्मा पूर्णः।

स वा एष पुरुषविध एव। तस्य पुरुषविधतामन्वयं पुरुषविधः।

प्राणमयेन पूर्ण एव स एष पुरुषविधः शरीरमित्यर्थः। पुरुषं पुरि शरीरे शयानं स्थितं चेतनं विशेषेण दधातीति पुरुषविधः शरीरम्। तस्य शरीरस्य पुरुषविधातमनु उद्दिश्यायं पुरुषविधः। अयं देहः पुरुषविध इत्युच्यते। पूर्वं प्राणमय आत्मेत्युक्तम्। इदानीं देह एवात्मेत्युच्यते।

तदप्येष श्लोको भवति ॥ २ ॥

तदर्थप्रतिपादकोप्येष श्लोकः ॥ २ ॥

इति द्वितीयोनुवाकः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथ तृतीयोनुवाकः

प्राणं देवा अनु प्राणन्ति मनुष्याः पशवश्च ये। प्राणो हि भूतानामायुस्तस्मात्सर्वायुषमुच्यते ॥

देवा विद्वांसो मनुष्या अविद्वांसोपीतियावत्। पशवो गवादयो योगिनो वा एते सर्व एव प्राणमनु प्राणन्ति यावत्प्राणाः शरीरे तावदेव विद्वांसोविद्वासो योगिनोपि पशवोपि जीवन्ति। अपगते प्राणे सर्वेषां जीवनं समाप्तं भवति। तदेव विम्रियते भूतानामायुः प्राण एव। तत एव प्राणः सर्वायुषमुच्यते सर्वेषामायुरुच्यते।

सर्वमेव त आयुर्यन्ति ये प्राणं ब्रह्मोपासते ॥

प्राण एवायुरिति सिद्धान्तयित्वा द्रढयति ये प्राणं ब्रह्मोपासते ते सर्वमेवायुर्यन्ति प्राप्नुवन्ति ॥

तदप्येष श्लोको भवति ॥ ३ ॥

एतदर्थप्रतिपादकः श्लोकश्चतुर्थानुवाकारम्भे प्रोच्यते ॥ ३ ॥

इति तृतीयोनुवाकः

●

अथ चतुर्थोनुवाकः

यतो वाचो निवर्तन्ते अप्राप्य मनसा सह। आनन्दं ब्रह्मणो विद्वान् न बिभेति कदाचन ॥

ब्रह्मण आनन्दं विद्वान् जानानः कदाचन कदापि न बिभेति। कस्मान्न बिभेति ? मृत्योरितिभावः। मृत्योरेव सर्वेषां भयं भवति। यो ब्रह्मण आनन्दं विजानाति निर्भय एव स भवति। न मृत्युस्तं भापयितुमुत्सहत इत्यर्थः। ननु आनन्दो ब्रह्मणोतिरिच्यते ? ब्रह्मैव वानन्दः ? आनन्द एव वा ब्रह्म ? उच्यते। ब्रह्मण आनन्दस्वरूपत्वान्नानन्दस्तस्माद्विभिद्यते। तथापि राहोः शिर इतिवत् प्रयोगोयं वेदितव्यः। अथवा ब्रह्मानुभवेन जायमानमानन्दं विद्वान्न बिभेतीत्यर्थः। कीदृशं तद्ब्रह्म ? वाचो यतो ब्रह्मणो निवर्तन्ते वाचा कथमपि यन्न बोधयितुं क्षमत इत्यर्थः। न केवलं वाचामगोचरं ब्रह्म, ततोपि सूक्ष्मस्य मनसोप्यगोचरं तत्, तदेवाह मनसा सहेति। ब्रह्मा प्राप्य वाचोपि निवर्तन्ते मनोपीतिभावः।

तस्यैष एव शारीर आत्मा। यः पूर्वस्य। तस्माद्वा एतस्मान्मनोमयादन्योन्तर आत्मा विज्ञानमयः। तेनैष पूर्णः। स वा एष पुरुषविध एव।

स्पष्टम्।

तदप्येष श्लोको भवति ॥ ४ ॥

स्वोक्तमन्योक्तेन प्रमाणयति तदप्येष श्लोको भवतीति। स च श्लोकः पञ्चमेनुवाके पठ्यते ॥

इति चतुर्थोनुवाकः

●

अथ पञ्चमोनुवाकः

विज्ञानं यज्ञं तनुते कर्माणि तनुतेपि च। विज्ञानं देवाः सर्वे ब्रह्म ज्येष्ठमुपासते ॥

विज्ञानमेव कर्त्रिति स्वीकृत्याह विज्ञानमेव यज्ञं लौकिकानि च कर्माणि तनुते। सर्वे देवा विज्ञानमेव ज्येष्ठं ब्रह्मेति मत्वोपासते।

विज्ञानं ब्रह्म चेद्वेद तस्माच्चेन्न प्रमाद्यति। शरीरे पाप्मनो हित्वः सर्वान्कामान्समश्नुत इति ॥

विज्ञानं ब्रह्म प्रशंसति। यदि विज्ञानमेव ब्रह्म वेद न च तस्मात्कदापि प्रमाद्यति सर्वं सर्वथा विज्ञायैव करोति तदा शरीरे पाप्मनो हित्वा सर्वान् कामान् समश्नुते।

तस्यैष एव शारीर आत्मा। यः पूर्वस्य। तस्माद्वा एतस्माद्विज्ञानमयादन्योन्तर आत्मानन्दमयः। तेनैष पूर्णः। स वा एष पुरुषविध एव ॥

स्पष्टम्।

तदप्येष श्लोको भवति ॥ ५ ॥

सर्वत्र तु प्रथमोदीरितमेवाग्रिमेण श्लोकेनोच्यते। अथवैपरीत्यं जातम् विज्ञानं ब्रह्मेत्येवोक्तम्। श्लोकेनापि तथैव तदेव वक्तव्यम्। परन्तु नात्र तथा। अत्र तु असन्नेव स भवतीत्युक्तं भविष्यति। कथं तर्हि संगतिः ? उच्यते विशिष्टं ज्ञानं विज्ञानम्। विशिष्टज्ञानमेव ब्रह्म।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विज्ञाने वैशिष्ट्यं चान्येनाश्लिष्टत्वम् । असन्नेव स भवतीति विशिष्टमेव ज्ञानम् । तत्रैव तथा मया व्याख्यास्यते ॥

इति पञ्चमोनुवाकः

●

अथ षष्ठोनुवाकः

असन्नेव स भवति असद्ब्रह्मेति वेद चेत् । अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुरिति ॥

विज्ञानं ब्रह्मेति पूर्वमुक्तम् । अनेन श्लोकेन तदेव प्रख्यापनीयम् । तच्च प्रकारान्तरेणोच्यते—यो ब्रह्मासदिति चेद्वेद जानाति, असन्नेव स भवति । अत्र ज्ञातुरसत्त्वं प्रकारद्वयेन । यदि ब्रह्मात्मनोरभेद एवेतिमतं तदा ब्रह्मणोसत्वे ज्ञातुरात्मनोप्यसत्त्वमेव स्यात् । तयोरभेदस्वीकारात् । ततश्चेद्विज्ञाता ब्रह्मास्तीति वेद जानाति तदा एनं सन्तमेव विदुः । भेदपक्षेपि सर्वेषामात्मनां ब्रह्मण एव धारकत्वादाधारत्वस्वीकारादाधारासत्त्व आधेयस्यात्मनोनुपपत्तिः । अतोस्ति ब्रह्मेति ज्ञानमेवोभयत्र हितावहम् । इति । उपनिषत्कालेपि ब्रह्मास्तित्वे संदिहाना विद्वांस आसन्निति ख्यापितं भवत्यनया श्रुत्या ॥

तस्यैष एव शरीर आत्मा या पूर्वस्य ।

व्याख्यातम् ।

अथातोनुप्रश्नाः ।

ब्रह्मस्वरूपमनिर्णीयापि केचन प्रश्ना इहोत्थाप्यन्ते । के ते ? आह—

उताविद्वानमुं लोकं प्रेत्य कश्चन गच्छति ।
आहो विद्वानमुं लोकं प्रेत्य कश्चन समश्नुते ॥

कश्चनाविद्वान् ब्रह्माजानानोस्वीकुर्वाणः प्रेत्य शरीरं संत्यज्यामुं लोकं परलोकं गच्छति ? आहो अथवा विद्वानेव ब्रह्म जानानः प्रेत्य अमुलोकं परलोकं समश्नुते । विद्वांस्तु प्रेत्येतोमुं लोकं समश्नुत एवेति निश्चितम् । परमविद्वानपि लोकममुं समश्नुते नवेति प्रश्नस्वरूपम् । असौ लोक इत्यनेन श्रुतिकारैः कल्पितः कश्चिल्लोकविशेष एवेहेष्टः । तं कल्पितं परलोकं ब्रह्माजानानोपि प्राप्नोत्यथवा केवलं जानान एवेति प्रश्नस्य हार्दम् । किं च गच्छतिसमश्नुवतोः प्रयोगोप्यस्वास्थ्यकरः । अविद्वानित्येतेन सह गच्छतीतिप्रयोगो विद्वानित्येतेन सह समश्नुते इतिप्रयोगश्च वैलक्षण्यमापादयतः । अविदुषो ब्रह्म प्रेत्य केवलं गमनम् । विदुषश्च ब्रह्म प्रेत्य तत्र समशनम् । अशूङ् व्याप्तौ । ब्रह्मास्तीति मन्वानः प्रेत्य ब्रह्मलोकमुपेत्य तत्र ब्रह्मैव भवतीति समश्नुते इत्यस्य तात्पर्यम् । ब्रह्म नास्तीति मन्वानस्य केवल तल्लोकस्य प्राप्तिरेव भवति न तत्र व्याप्तिः । अस्ति ब्रह्म इति मन्वानो ब्रह्मैव सत् अमुं लोकं व्याप्यावतिष्ठते । नास्ति ब्रह्मेति मन्वानोमुं लोकं मरणानन्तरं गच्छति केवलं न तत्र समश्नुते । ब्राह्मणोभावान्न तस्य ब्रह्मरूपता भवतीति । एतदनुप्रश्नयोर्नास्तीहोत्तरम् । ब्रह्माधिकृत्य द्वयोः प्रश्नयोरुत्थानं भवतीति सूचयितुमेवायं प्रयासः । नात्रोत्तरापेक्षेति मत्वा न कुत्राप्यनयोरुत्तरमस्मिन्ननुवाके परस्मिन्ननुवाके वा दृश्यते । अतः केवलं मतद्वयस्यानुप्रदर्शनार्थमेवानुप्रश्नयोरत्र प्राणनम् ।

किं चातोनुप्रश्ना इत्यस्यासन्नेव स भवतीत्यादि श्रुत्यापि सम्बन्धो योज्यः । पूर्वश्रुतावेवानुप्रश्नाः । ब्रह्मास्ति नवास्तीत्युभयमेव पक्षमाश्रित्यात्रैवानुपृच्छा । ब्रह्म नास्तीति स्वीकर्ताविद्वानिति पदेन लक्षितः । अस्तीति स्वीकर्ता विद्वानितिपदेन लक्षितः । वस्तुतस्त्वथातोनुप्रश्ना इति सर्वथात्रासंगतमिव प्रतिभाति । नास्त्येकोपि प्रश्नोत्र किं तर्हि वक्तव्यं बहुवचनप्रयोगेण विज्ञाप्यमानानां बहूनां प्रश्नानाम् । ब्रह्मणः सदसत्त्वशंकामूलं तु शक्यत इत्थमुत्थापयितुम् । यस्यास्तित्वं तद्येन केनापि रूपेणेह प्रतीतमेव भवति । नाप्रतीतमस्ति न चास्त्यप्रतीतम् । शशविषाणादि नास्ति प्रतीतमतो नास्तीति सर्वैरप्युच्यते । जलमस्तीति प्रतीतमेवातोस्तीति सर्वैरप्युच्यते । ब्रह्म न कथमपि कस्यापि प्रतीतमस्तीति तन्नास्तीति वागवसरः । जगतः कारणत्वेन ब्रह्मणोनुमानं तु स्वभवनक्रीडाङ्गनरमणमेव । येन जगत उत्पत्तिरेव नाङ्गीक्रियते कथं तस्य जगत्कारणत्वेन हेतुना मुखमुद्रा दत्ता भवेत् । यदस्ति तदुत्पत्तिमदेवेति अस्तित्ववतो जगत उत्पत्तिमत्तानिवार्येति चेन्न । यदि ब्रह्माप्यस्ति त्वन्मते तर्हि तस्याप्युत्पत्तिप्रतिपादनं तव गले निपतितम् । यदि तदपि स्वीकृतं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भवेत्तर्हि ब्रह्मणोनित्यत्वापत्तिः। ततश्च ब्रह्मस्वीकार एव नैरर्थक्यं भजेत। दृश्यं यदस्ति तस्यैवोत्पत्तिमत्त्वस्वीकारे आकाशेव्याप्तिरेव स्यात्। उपनिषन्मते आकाशस्यापि जन्यत्वस्वीकारात्। वायोरप्यदृश्यत्वादेव जन्यत्वनिषेधः स्यात्। एवं दृश्यं यदस्ति तस्यैवोत्पत्तिमत्तावचनं नास्ति निर्दोषम्। यद्यस्माज्जन्यं तत्तदस्तित्वं प्रख्यापयतीति वचनमपि न बह्वादर्तव्यं भवति। आकाशमखिलं जगद्वा ब्रह्मणो जातमिति केन दृष्टम्? श्रुत्योपदिश्यत इति त्वन्यदेव। येषां मते नास्त्युपनिषद्वचोमहत्त्वं तेषां मनःप्रसत्तिः केन द्वारेण कृता भवेत्? केवलमुपनिषत्प्रमाणकानामेव ब्रह्म वेद्यमुपकारकं चेति मतं चेन्नास्ति विवादः कस्यापि। मम गेहे सुवर्णमयः सुमेरुरहं च भिक्षुकोन्नार्थीति वक्तारं को निषेद्धुं प्रभवेत्? यदस्ति तज्जन्यमेवेति वदता ब्रह्मणोस्तित्वं स्वीकुर्वता ब्रह्मणोपि जन्यत्वं स्वीकृतमेव स्यात् न च कार्यत्व एव जन्यत्वव्यवहारात् ब्रह्मणोकार्यत्वे न तत्रजन्यत्ववचनोपपत्तिरिति वाच्यम्। कार्येतरवस्तुसत्त्वे प्रमाणविरहात्तन्नास्तीत्येव विदुषां पक्षः। न च क्षित्यंकुरादिकं सकर्तृकं जन्यत्वात्। यत्र जन्यत्वं तत्र सकर्तृकत्वमित्यादि तर्ककर्कशकशासत्त्वात्कथमकर्तृणो जगतः स्वीकार इति वाच्यम्। क्षित्यंकरादिकमस्तीति तज्जन्यत्वं स्वीक्रियते आहोस्वित् तज्जन्यत्वे एव तदस्तित्वमङ्गीक्रियत इति पूर्वं विचारणीयम्। तदस्तीति तज्जन्यत्वमिति चेत् ब्रह्मास्तीति तस्यापि जन्यत्वमबाधितं स्यात्। जन्यत्वेस्तित्वं नित्यत्वनिवारकं स्यात्। यन्नित्यमस्तीति न तत्र जन्यत्वमिति चेदुच्यते ब्रह्मणोस्तित्वे नित्यत्वेत्र सत्प्रमाणाभावात्। उपनिषदेव प्रमाणमिति चेद्बृहस्पतिवचनमपि न कथं प्रमाणं भवेत्। यदि तद्वचनमपि प्रमाणस्तर्हि नास्त्येव ब्रह्म। न चावैदिकत्वात्तेषां वचने न प्रामाण्यबुद्धिः कर्तव्येति वाच्यम्। वैदिकत्वाद्भवतां वचनेपि न प्रामाण्यबुद्धिः कर्तव्येति तेषामवैदिकानामपि महता स्वरेणोद्घोषितत्वात्। अतः कस्यचिद्वचनेन कस्यचिदप्रतीयमानस्य सत्तायां प्रतीतिः परमापदामाश्रयः। इति विरम्यते।

अप्राकरणिकमप्युपयोगित्वात्कश्चिसृष्टिक्रम उच्यते—

सोकामयत बहु स्यां प्रजायेयेति। स तपोतप्यत। स तपस्तप्त्वेदं सर्वमसृजत यदिदं किञ्च। तत्सृष्ट्वा तदेवानुप्राविशत्।

स ब्रह्माकामयतैच्छत् देवमनुष्यपशुपक्ष्यादिरूपेण तरुलतागुल्मादिरूपेण नदनदीनदीपत्यादिरूपेण च बहु स्यामिति। बहुभवननिमित्तं विचारयामास प्रजायेयेति। यद्यहमन्यान्पदार्थाञ्जनयेयं तेषु बहुषु व्यापनान्ममापि बहुत्वं स्यादिति। प्रजायेयेत्यस्य प्रजनयेयमित्येवार्थः। न हि ब्रह्म स्वयं प्रजातं बहुत्वं च गतमिति कुत्राप्यग्रिमासु श्रुतिषूपलभ्यते। तथाविधकामज्ञानन्तरं तत्तपोतप्यत। नात्र तपः शरीरसन्तापनम्। शरीरस्यैवाभावात्। स्रष्टव्यपदार्थालोचनं कृतवत्। तप आलोचने। तत् तपस्तथाविधालोचनंतप्त्वा कृत्वा सर्वमिदमसृजत। सर्वं किम्? यदिदं दृश्यमानं प्रतीयमानं वा किंच किञ्चिदस्तीति। ततस्तत्सर्वं सृष्ट्वा तदेवानुप्राविशत्तत्र व्याप्नोत्। ब्रह्मणो व्यापकत्वात्त द्व्याप्तेः स्वाभाविकत्वेन तदनुप्रवेशस्य सिद्धसाधनम्।

तदनुविश्य सच्च त्यच्चाभवत्। निरुक्तं चानिरुक्तं च निलयनं चानिलयनं च। विज्ञानं चाविज्ञानं च। सत्यं चानृतं च। सत्यमभवत्। यदिदं किं च तत्सत्यमित्याचक्षते। तदप्येष श्लोको भवति।

तदुत्पन्नवस्तुजातमनुप्रविश्य तद्ब्रह्म सच्चाभवत् त्यच्चाभवत्। तत्तदोः सर्वनाम्नोः समानार्थत्वेपि तयोरुभयोरेवात्र ग्रहणं कंचिद्भेदं व्यवस्थापयति। सचेत्यम्—सच्छब्देनेन्द्रियग्रामगम्यं मूर्तपदार्थजातं ग्रहीतव्यम्। त्यच्छब्देन च वाय्वाकाशादिग्रहीतव्यम्। तदेव स्पष्टयति निरुक्तमित्यादिना। निरुच्यते स्पष्टतया पृथक्क्रियत इति निरुक्तं रूपितपदार्थजातम्। निरुक्तमनिरुक्तमाकाशादिकम्। एवं निलयनं नितरां लयनं निलयनम्। लयनं संश्लेषणम्। जलादीनां परस्परं निलयनं भवति। जलं भूमौ लीनाति भूमिश्च जले लीनाति। एवमन्येषामपि लयनमुन्नेयम्। न निलयनमनिलयनम्। ये पदार्थाः परस्परं न निलीनन्ति तेनिलयनपदवाच्या आकाशादयः। विज्ञानमजडमविज्ञानं जडम्। तत्तद्वस्तुरूपतां गतं ब्रह्मेत्युक्तं भवति। यत्र व्यावहारिकं सत्यत्वं तदपि यत्र व्यावहारिकमसत्यत्वं मृगजलमित्यादि, सर्वं तदभवदितिभावः। सर्वत्र तद्व्याप्तमभवदित्याशयः। सत्येष्वनृतेष्वपि निलीयमानं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तद्ब्रह्म सत्यं सत्यमेवाभवत्। ह्यसत्येन तस्य मनागपि संश्लेष इति तात्पर्यम्। यदिदं किं च जगत्यामनुभूयमानं वस्तुजातमस्ति तत्सर्वं सत्यमित्यभवत् सत्यब्रह्मसंस्पृष्टत्वेन सत्यमभवत् परन्तु तत्तु ब्रह्म तु सत्यमित्याचक्षते न किञ्चिदन्यत्सत्यसंनिधानेन तस्य सत्यत्वमितिभावः। तत्र तु स्वाभाविकं स्वतःसिद्धं सत्यत्वमिति तात्पर्यम्। तदपि तत्राप्येष श्लोको भवतीत्युत्तरेणनुवाकेन संबध्यते।

इति तैत्तिरीयोपनिषदि षष्ठोनुवाकः

●

अथ सप्तमोनुवाकः

असद्वा इदमग्र आसीत्। ततो वै सदजायत। तदात्मानं स्वयमकुरुत तस्मात्तत्सुकृतमुच्यत इति॥

इदं सर्वं पूर्वोक्तं जातं वस्तु अग्रे सृष्टेः प्राक् असदेवासीत् अजातत्वेनासत्त्वमासीत्। पूर्वं किमपि जन्यं वस्तु नासीदितिभावः। तर्हि कुतस्तदायातमित्याह—तत एव ब्रह्मण सदजायत। अत्र पौर्वापर्यं निर्धारणीयम्। तच्च ततोजायत पूर्वं ततः परं सदित्याख्यां समभजतेति। ततो वै सदजायतेत्येव विवृणोति तद् ब्रह्म आत्मनां जीवजातं स्वयमकुरुतोदपादयत्। तस्मास्तद्धेतोस्तत्सुकृतं शोभनकृतिमदुच्यते। सु शोभनं कृतं सुकृतत्। सुकृतमस्ति अस्येति सुकृतम् धार्यत्वेन पोष्यत्वेन च अर्शआदित्वादच्। भोक्तुरात्मनोभावाद्भोज्यवस्तुजातोत्पादनस्य वैयर्थ्यमेव स्यादिति तमुत्पाद्य सुकृतत्वं भेजे ब्रह्मेतितात्पर्यम्। नन्वेतेनात्मनोनित्यत्वं समायाति, समायातु नाम तत्र नास्ति चिन्तोपनिषदाम्। अथवात्मानमकुरुतेत्यस्य तत्तद्वस्तुभोक्तृत्वेनात्मानं न्ययुङ्क्तेत्यर्थ इति न भवेत्कस्यापि मनस्ताप इति।

तद्वै तत्सुकृतम्।

तत्सुकृतमपि जातवस्तुजातविशिष्टमपि तद्वै ब्रह्मैव। सृष्टिवैशिष्ट्येनापि न ब्रह्मणोसम्बन्धहानिः। जलसंसृष्टमपि पद्मपत्रं यथाम्भसा नानुलिप्यते तथैव सृष्टिविशिष्टमपि ब्रह्म न सृष्ट्या दूष्यते।

रसो वै सः। रसं ह्येवायं लब्ध्वानन्दी भवति।

रसो वै स ब्रह्म। पुंस्त्वमौपनिषदम्। रस्यते आस्वाद्यतेनुभूयत इति रसः। जीवात्मनानुभूयमानत्वाद्ब्रह्म रस इत्युच्यते। रसमेव तद्ब्रह्मैव लब्ध्वा प्राप्यायं जीवात्मानन्दी भवति। एवं चात्मन आनन्दो न स्वाभाविकः। ब्रह्मण एव स प्राप्यते। ब्रह्मरसं प्राप्यात्मानन्दी सर्वदुःखात्यन्ताभाववान् भवतीतिभावः।

शब्दान्तरेण तमर्थमेव प्रकाशयति—

को ह्येवान्यात्कः प्राण्याद्यदेष आकाश आनन्दो न स्यात् एष ह्येवानन्दयाति।

यद्यदि समन्तात्काशते प्रकाशते दीपयति वा स एष आकाश आनन्दो न स्यात् को ह्यत्रान्यात् आनन्दव्यतिरेकेण कस्माअपि जीवनं न रोचेत। कः प्राण्यादिति तदेव द्रढयितुं पुनरुक्तिः। यत एष हि तद्ब्रह्मैव सर्वं जीवजातम् आनन्दयाति आनन्दयति। यतस्तदानन्दस्वरूपमतः सर्वान् आनन्दयतीति भावः। रसानन्दयोः पर्यायत्वं स्वीकृत्येयमुक्तिः।

यदा ह्येवैष एतस्मिन्नदृश्येनात्म्येनिरुक्तेनिलयने भयं प्रतिष्ठां विन्दतेथ सोभयं गतो भवति।

कियदवधिकमात्मनो भयं संसारयात्रारूपं भवतीति स्पष्टयति। यदा एष जीवात्मा एतस्मिन्नदृश्ये चक्षुरादीन्द्रियाविषयीभूते अनात्म्ये आत्मनः सुखदुःखाद्यनुभवसाधनं शरीरमात्म्यमुच्यते। नात्म्यमनात्म्यम्। तस्मिन्नात्म्ये शरीररहिते निरुक्तेनिलयने ब्रह्मणि अभयमभये सप्तम्यर्थे द्वितीया प्रथमा वा। प्रतिष्ठां स्थितिं विन्दते प्राप्नोति अथ तदनन्तरमेव सोभयं गतो भवति। सर्वभयविनिर्मुक्तो भवतीतिभावः। अभयमिति क्रियाविशेषणमितिकेचित्। क्रियाविशेषणस्य क्रिययैवान्वयः। तथा च प्रतिष्ठामभयं विन्दत इत्यस्य प्रतिष्ठां निर्भयत्वेत विन्दत इत्यर्थः स्यात्। प्रतिष्ठाप्राप्तौ न भयमित्यर्थः। तत्र न किञ्चिदर्थसौष्ठवम्। अतो मदुक्तया रीत्यैव व्याख्येयम्। अथ यदात्माभये प्रतिष्ठां विन्दते तदा सोभयं गतो भवति निर्भयो भवति संसारदुःखप्रविमुक्तो भवतीत्यर्थः।

यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुतेथ तस्य भयं भवति।

वैपरीत्ये फलं दर्शयति। यदा चैतस्मिन् ब्रह्मणि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

उदरमपि अत्यल्पमपि अन्तरम् उत्कुरुते उद्भावयति अहमन्यस्तदन्यदिति, अथ तदा तस्यात्मनो भयं भवति। संसारी भवतीतिभावः। संसारापसारणाय सर्वान्तरं निरन्तरं कर्तव्यमित्युपदेशः।

तत्त्वेव भयं विदुषोमन्वानस्य।

तद् ब्रह्मामन्वानस्यैव विदुषो भयं भवति न तु तन्मन्वानस्येतिवेदितव्यम्। ननु विदुषः, अमन्वानास्य चेति विरुद्धमुच्यते। यदि विद्वान् न ब्रह्मामन्वानः। यदि ब्रह्ममन्वानो न विद्वान्। कथं तर्ह्यत्र पदद्वयस्य संगतिः। इत्थम्। अत्र विद्वच्छब्दः सामान्यज्ञानिपर इत्यवधेयम्।

तदप्येष श्लोको भवति ॥ ७ ॥

तदर्थप्रतिपादकोप्येष श्लोकोष्टमेनुवाके वक्ष्यमाणो वर्तते ॥

इति तैत्तिरीयोपनिषदि सप्तमोनुवाकः

●

अथाष्टमोनुवाकः

भीषास्माद्वातः पवते भीषोदेति सूर्यः। भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चम इति।

अस्मादिति षष्ठ्यर्थे पञ्चमी। अस्यैव ब्रह्मणो भीषा भयेन वातः पवते गच्छति वाति। सूर्योप्युदेति इन्द्रः प्रचण्डोग्निर्मृत्युश्चापि धावति। पञ्चम इत्युक्तिर्न विशिष्टार्थसम्पादिका। इन्द्रपदमग्निविशेषणमिति विद्योतिका चेति। अन्यत्सर्वमनौपनिषत्त्वात्त्यक्तम् ॥ ८ ॥

स यश्चायं पुरुषे यश्चासावादित्ये स एकः।

योयमात्मा पुरुषे शरीरे विद्यमानोस्ति सः, यश्चासावादित्येस्ति स च एक एव। भूमिष्ठशरीरादारभ्य नभःस्थसूर्यपर्यन्तेषु पदार्थेषु वस्तुष्वणुषु परमाणुषु सर्वत्रैवैकमेव व्यापकं ब्रह्मावतिष्ठते। ब्रह्मणो ब्रह्मातिरिक्तानि सर्वाण्येव वस्तूनि व्याप्यानि तेषु च सर्वेषु वस्तुषु ब्रह्म व्यापकम्। अन्यत्सर्वमिहानौपनिषत्कत्वात्त्यक्तम् ॥

इति तैत्तिरीयोपनिषदि अष्टमोनुवाकः

अथ नवमोनुवाकः

यतो वाचो निवर्तन्ते अप्राप्य मनसा सह। आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चनेति।

यतो ब्रह्मणो मनसा सह वाचस्तद्ब्रह्माप्राप्याप्रकाश्य निवर्तन्ते तं ब्रह्मण आनन्दं विद्वान् अनुभविता कुतश्चन लोके न बिभेति। सर्वभीस्तस्यापगता भवतीति। अत्र ब्रह्मण आनन्दमित्यत्र सम्बन्धार्थे षष्ठी। सा च न युज्यते। आनन्दस्वरूपं हि ब्रह्म। आनन्दो ब्रह्मणः स्वरूपम्। भेदे हि षष्ठी भवति। नात्र भेदः। न हि ब्रह्मण आनन्द इति। किन्तु ब्रह्म एवानन्द इति। एवं च ब्रह्मण इति षष्ठी मूले द्वितीयार्था। असम्बद्धं हि ब्रह्म। सर्वसम्बन्धविरहितमेव तत्। शृण्वन्तु विश्वे अमृतस्य पुत्रा इत्यृग्वचनं तु उपासनदिक्प्रणेतृ। न वास्तविकम्। एवं "स नो बन्धुः" इत्यादिवचनमप्युन्नेयम्।

एतं ह वाव न तपति, किमहं साधु नाकरवम्। किमहं पापमकरवमिति।

एतं ब्रह्मज्ञं किमहं साधु नाकरवं किं च पापमकरवमिति चिन्तानलो न तपति न तापयति। ब्रह्मज्ञानी हि सर्वकर्मफलविनिर्मुक्तो भवति यतो न फलस्य तस्य कुत्रापि प्रवृत्तिः। न हि केनचित्कर्मणा ब्रह्मविदः फलेप्सा जायते। सर्वं कर्म तस्य नैसर्गिकं भवति। अतस्तस्य साध्वसाधुविचार एव न प्रवर्तते, अत एव नास्ति तस्य चिन्ता।

स य एवं विद्वानेते आत्मानं स्पृणुते उभे ह्येवैष एते आत्मानं स्पृणुते। य एवं वेद। इत्युपनिषत् ॥

स यो विद्वान् एते पुण्यपापे नाहमकरवमिति निश्चिन्वान आत्मानं स्पृणुते प्रीणयति रक्षति वा पुण्यपापविचारात्। उभे एव एते पुण्यपापे आत्मानं स्पृणुते। कृते एव ते न पापाय वा पुण्याय वा सुखाय वा दुःखाय वा भवतः। अकृते ते न पापाय न पुण्याय। एवं ते आत्मानं स्पृणुत एव। कमात्मानं ते स्पृणुताम्? उत्तरम्—य एवं वेद। पापुण्याभ्यामस्पृष्टं ब्रह्म आनन्दस्वरूपं हि भवति। इत्युपनिषत्। एतादृशी विद्यैवोपनिषद्विद्यात्वेन प्रसिद्धेति। अथवात्रैव ब्रह्मवादिनी उपनिषत् समाप्ता। भृगुवल्ल्यां तु सामान्येन विद्या निर्दिष्टेति ॥९॥

इति तैत्तिरीयोपनिषदि नवमोनुवाकः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथ तैत्तिरीयोपनिषदि

भृगुवल्ल्यां प्रथमोनुवाकः

यद्यप्यस्या वल्ल्या नोपनिषत्त्वम्। तथापि प्रसिद्धां यतो वा इमानीति श्रुतिं व्याख्यातुं मया केचनांशा व्याख्यायन्ते।

भृगुर्वै वारुणिर्वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति।

वरुणस्य पुत्रो भृगुः पितरं वरुणमुपससारोवाच च, भगवो भगवन् मां ब्रह्माधीष्वाध्यापय बोधयेति।

तस्मा एतत्प्रोवाच अन्नं प्राणं चक्षुः श्रोत्रं मनो वाचमिति। तं होवाच।

विधिवदुपसन्नं स्वपुत्रं वीक्ष्य तस्मै पुत्राय एतत्प्रोवाच। एतत् किम्? अन्नं प्राणं चक्षुः श्रोत्रं मनो वाचमिति। सर्वेषां द्वितीयान्तपदानां प्रोवाचेत्यनेनान्वयः। अन्नादीनां नामोच्चारणानन्तरं स तं स्वपुत्रमुवाच—

यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशन्ति। तद्विजिज्ञासस्व तद्ब्रह्मेति।

यतो यस्मादिमानि भूतानि अन्नप्राणादीनि जायन्ते, जातानि च सर्वाणि येन हेतुना जीवन्ति वर्धन्ते। यच्च कारणं प्रयन्ति प्रगच्छन्ति। अस्यैव स्पष्टीकरणार्थम् अभिसंविशन्तीत्युच्चारणम्। तद्विजिज्ञासस्व तदेव विज्ञातुमिच्छ। यतस्तदेव ब्रह्मेति। यस्माज्जगज्जायते येन च हेतुना जातं जगत् जीवति तिष्ठति यस्मिंश्चास्य जगतोभिसंवेशो भवति प्रलयो भवतीत्यर्थः। तदेव ब्रह्मेति। जगज्जनकत्वे सति जगज्जीवयितृत्वे सति जगदभिसंवेशस्थानत्वे सति ब्रह्मत्वमिति लक्षणम्। उत्पत्तिस्थितिलयेषु त्रिष्वपि कालेषु भूतानि यदात्मत्वं न जहाति तद् ब्रह्मणो लक्षणम्। यत्र यवा उदिताः सन्ति तद् देवदत्तक्षेत्रमितिवत् सर्वेषां भूतानां यत् त्रैकालिकं स्थितिस्थानं तद्ब्रह्मेति। तथाभूतं ब्रह्म विजिज्ञासस्व। विजिज्ञासस्वेत्यस्य अन्नादिद्वारेण तद्ब्रह्म प्रतिपद्यस्वेत्यर्थः केषांचित् स तु न सामीचीन्यमञ्चति। यज्जगत उत्पादकम्, यच्चोत्पन्नस्य जगतो निवासस्थानम्, यच्चान्ते जगतो लयस्थानं तद् ब्रह्मेति विस्पष्टमुक्ततत्वात्। उपदिष्टं हि वरुणेन ब्रह्मस्वरूपं साकल्येन। न किञ्चिदवशिष्टम्। अतोत्रैवोपनिषत्समाप्तिः। एवं स तपस्तप्त्वा अन्नं ब्रह्मेति व्यजानात्, प्राणो ब्रह्मेति व्यजानात् मनो ब्रह्मेति व्यजानात्, विज्ञानं ब्रह्मेति व्यजानात्, आनन्दो ब्रह्मेति व्यजानादित्यादि सर्वं निरर्थकमेव। न हि पित्रोक्तम् अन्नं ब्रह्म प्राणो ब्रह्मेत्यादि। यदि वैकल्पिकत्वेन स्यादुपदेशस्तस्य तदा तपसः स्यादादरणीयत्वम्। तत्र तु विस्पष्टमाचष्ट यत इदं सर्वं भवति तद्ब्रह्मेति। नास्ति ततस्तपसः कारणं किञ्चिदपि। अतोत्रैवोपनिषत्समाप्तिः। ब्रह्मविद्यात्रैव सम्पन्ना भवति। किंचैतस्य सर्वस्य विज्ञानस्य फलं षष्ठेनुवाके अन्नवानन्नादो भवति भवति महान् प्रजया पशुभिर्ब्रह्मवर्चसेन। महांश्च नीत्या भवतीत्येव फलमुक्तम्। न तु ब्रह्मस्वरूपज्ञानम्। ततोपि नास्त्यतः परमु उपनिषदिति विज्ञायते॥

इति तैत्तिरीयोपनिषदि भृगुवल्ल्यां प्रथमोनुवाकः

स्वामि-श्रीभगवदाचार्यपपिण्डतराजप्रणीतं तैत्तिरीयोपनिषत्संस्कारभाष्यम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri